CS (MAIN) Exam : 2017

STH-C-SNKT

# संस्कृतम् / SANSKRIT

## ( अनिवार्यम् ) / ( COMPULSORY )

समयः : होरात्रयम् (घण्टा–त्रयम्)
*Time Allowed* : **Three** *Hours*

पूर्णाङ्काः : **300**
*Maximum Marks* : **300**

---

### प्रश्नपत्रविषये विशेषनिर्देशाः

***प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिताः निर्देशाः सावधानतया पठनीयाः***

*सर्वेऽपि प्रश्नाः समाधेयाः ।*

*प्रत्येकं प्रश्नस्य / प्रश्नभागस्य अङ्काः तत्पुरत एव निर्दिष्टाः ।*

*यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि* ***संस्कृत****भाषया एव देवनागरीलिपिनिबद्धया लेखनीयानि ।*

*यत्रापि पदसीमा निर्धारिता तत्र सा अनुपालनीया एव । उत्तराणि चेत् सीमातः अधिकमात्रया विस्तीर्णानि लघूतराणि वा भवेयुः तदा अङ्कहानिः भविष्यति ।*

*प्रश्नपत्रसहितोत्तरपुस्तिकायाः किमपि पृष्ठं पृष्ठांशो वा यदि रिक्तः त्यज्यते सः अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीयः ।*

*प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । न चेत् अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।*

### Question Paper Specific Instructions

***Please read each of the following instructions carefully before attempting questions :***

*All questions are to be attempted.*

*The number of marks carried by a question / part is indicated against it.*

*Answer must be written in SANSKRIT (Devanagari script) unless otherwise directed in the question.*

*Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

---

**Q1.** **अधोदत्तेषु विषयेषु कमपि *एकं* विषयमधिकृत्य षट्शत-पदैः (600-परिमितपदैः) निबन्धो लेखनीयः ।** ***100***

(a) प्रयुक्तिकौशलानाम् (technology) अतिमात्रिक-प्रयोगस्य विपत्तयः ।

(b) धर्मनिरपेक्षता लोकतन्त्रस्य बलम् ।

(c) विमुद्रीकरणस्य भारतीयार्थनीतौ दीर्घकालीना उपकाराः ।

(d) आयुर्वेद-पद्धतिं प्रति पाश्चात्य-देशानाम् आकर्षणम् ।

**Q2.** **अधोलिखितं गद्यांशं सावधानं पठित्वा तदधस्ताद् प्रदत्तानां प्रश्नानामुत्तरं स्पष्टतया स्वगिरा दीयताम् ।** ***12×5=60***

मस्तिष्कस्य कृते श्रेष्ठं खाद्यं नाम पुस्तकानि । केनापि मनीषिणोक्तं यत् मानुषैर्यदेव चिन्तितं, कृतं, प्राप्तं च, तत्सर्वं ग्रन्थेषु विधृतं वर्तते इति । मानवसभ्यतायाः संस्कृतेश्च वर्धनं चाग्रगतिश्चेति यत्, तस्य कृतित्वं ग्रन्थानामेव । ग्रन्थानां महत्त्वं मूल्यं चातुल्यम् । ग्रन्था अन्तरतमं सत्त्वं ज्ञानालोकितं विदधति । उत्तमा ग्रन्था मानवान् पशुत्वाद् देवत्वम् उपनयन्ति, तेषां धार्मिकान् व्यवहारान् जागरयन्ति तथा च मनुष्यान् समाजं राष्ट्रं च मार्गं दर्शयन्ति । ग्रन्था अस्मान् प्रेरयन्ति, अस्माकं मनसि मस्तिष्के च तेषां स्थायी प्रभावश्च भवति ।

विनोदाय अपि ग्रन्था मनुष्यान् सेवन्ते । विनोदस्यार्थो न केवलं प्रभूतं भोगसुखं, परमेतन्नाम किंचिद् गूढतरम् । ये नाम ग्रन्थाः पाठकानां मनो गभीरं संस्पृशन्ति, तेषां हृदयं संवेदयन्ति च, ते एव सार्थकतया विनोद-ग्रन्था इति । ये ग्रन्थाः पाठकचित्तमाविष्टं कुर्वन्ति, ते सन्ति आनन्दकराः । एवं लघु-साहित्यस्यापि नाल्पं माहात्म्यम् । ईदृशं साहित्यकर्म मनुष्याणां मनोभारम् अल्पीकरोति विषादभारं दूरीकरोति च ।

उत्तमा ग्रन्था मनुष्येभ्यो ज्ञानमानन्दं च वितरन्ति । कला-विज्ञान-वाणिज्य-व्यवहारविधीन् चाधिकृत्य प्रणीता ग्रन्था मनुष्याणां ज्ञानविस्तारं साधयन्ति । तानधीत्य मानवा आन्तरं बलमनुभवन्ति । सत्यमेतद् — ग्रन्था अस्माकं यथार्थाः मार्गदर्शकाः । ते न केवलं नवनवविषयेषु ज्ञानं ददति, परं तेऽस्मान् चिन्तनाय मननाय च बलात् प्रेरयन्ति । संशय-निरसनाय सहायतां कृत्वा ग्रन्था अस्मान् दृढीकुर्वन्ति इति । गान्धी-महाभागः गीतां स्वीया जननीति उक्तवान्, यतोऽयं ग्रन्थस्तस्मै सर्वासु कठिनावस्थासु मार्गं दर्शितवान् । ग्रन्थास्तादृशा मार्गदर्शका ये न दण्डविधानं कुर्वन्ति, न वा क्रुध्यन्ति, न च विनिमयमूल्यरूपेण किमपि याचन्ते; परं सममेव ते अमृतत्व-रसप्रदाने कदापि न व्यर्था भवन्ति ।

सुखं शान्तिं च मानवेभ्यो ददति ग्रन्थाः । ग्रन्थप्रेमिकः धन्यो जनः, स कदापि क्लान्ति-बोधेन पराभूतो न भवति, न च कदापि रिक्ततामनुभवति । ग्रन्थाः सर्वथा विश्वासपात्राणि ।

बुद्धिसंघर्षे ग्रन्था एव शस्त्राणि । ग्रन्थगता भावना: समग्रं समाजं परिवर्तयितुं समर्था: । सांप्रतिकं जगत् नाम भावनात्मकं जगत् । समाजस्य विपरिणामा विपर्यासाश्च भावनाप्रसूता: । श्रेष्ठा ग्रन्था जनस्य विवेकमुद्‌बोधयन्ति, जनजागरणे च विशिष्टां भूमिकां निर्वाहयन्ति । ग्रन्थपाठेन मानवमनसो दिगन्तः उदारीभवति, मानवचित्ते उच्चकोटिका भावना: प्रविशन्ति च ।

ग्रन्था नाम तद् अमरं धनं यत् पूर्वजानाम् अनुभवान् उत्तरकालीन-जनेभ्य: सम्यक् निपुणं प्रयच्छति । ग्रन्थविधृतं ज्ञानं नाशयितुं कोऽपि न समर्थ: । समासेनोच्यते — ग्रन्थमूल्यम् अपरिमेयमिति ।

(a) कथं ग्रन्थानां मूल्यम् अपरिमेयम् ? *12*

(b) ग्रन्थकार: किं बोधयति 'विनोदस्य अर्थ: किंचिद् गूढतरम्' इत्यनेन ? *12*

(c) कथं ग्रन्था अस्माकं यथार्था मार्गदर्शका: ? *12*

(d) गान्धी-महाभाग: कथं गीतां स्वीया जननीति उक्तवान् ? *12*

(e) ग्रन्था: कथं समाजे अभिनवजागरणं संसाधयन्ति ? *12*

**Q3. अधस्तनगद्यभागस्य संक्षेप: मूलभागस्य तृतीयांश-परिमित एव लेख्य: । शीर्षको न प्रदेय: ।** ***60***

परिश्रमो जगति साफल्यस्य उपायेषु महत्तम: । परिश्रमेण वयमस्माकं उच्चाशा: सफलीकर्तुं शक्नुम: । इदं जगत् कर्मक्षेत्रम्; अत: अस्माकं कर्तव्यं भवति कर्मसंपादनम् । कठिनं श्रमं कृत्वैव वयं साफल्यं प्राप्तुं शक्नुम: ।

परिश्रम: जीवने गतिम् आनयति । यदि वयं कर्मणि उदासीना भवाम: तदा जीवनस्य गति: स्तब्धा भविष्यति । आलस्यं तस्य वृत्ते अस्मान् एवं वेष्टितान् करोति, यदस्य बाधनं कठिनं भवति; परं परिश्रमी जन: सर्वं संकटजातं पराभूय अग्रे सरति, बहुमात्रिकं साफल्यं च लभते । श्रमशीलो जनो भाग्यवादं नाश्रयति, किं तु अध्यवसायेन चलति । प्रयत्नं कृत्वापि यद्यसफल:, तदापि स नावसन्नो भवति । व्यर्थताया: कारणानि निर्णेतुं चेष्टते स: ; यद्वा उच्यते — स्वदोषान् अपाकर्तुं कर्म करोत्येव स:, येन साफल्यं प्राप्स्यति इति ।

संसारेऽस्मिन् प्रतिपादक्षेपम् अस्माभि: संग्राम: कर्तव्य:, स्वमार्गो निर्मातव्यश्च । वयं यथा-कथमपि सबला उपायकुशलाश्च स्म:, तन्नास्माकं साफल्यप्राप्तिमार्गम् अस्मान् नयति, यदि वयं परिश्रमं न कुर्याम । महापुरुषाणां सर्वेषामेव साफल्यस्य मूलमस्ति कर्मशक्तिर्बलं च ।

अस्माकं समाजे बहवो जना भाग्यवादिनः सन्ति । एतादृशा जनाः समाजस्य अग्रगतिं बाधन्ते । कोऽपि भाग्यवादी कदापि अस्मिन् जगति महत्त्वपूर्णानि कर्माणि न कृतवान् । सर्वं महद् आविष्कारजातं सर्वा उद्भावनाः सृष्टयश्च सुकठिन-श्रमसाध्यम् एवाभवन् । अस्माकं द्रव्यजातं प्रतिभा च सहायकमात्रम्, येनास्माकं मार्गगमने सहायता क्रियते; किं तु लक्ष्यप्राप्तिस्तु केवलं श्रमसाध्या एव ।

श्रमेण वयं ख्यातिं समृद्धिं च प्राप्नुमः । यदा वयं कर्तव्य-करणाय श्रमेण कार्यं साधयामः, तदा वयं गभीरं सुखं लभामहे । अन्तरात्मनः सर्वाणि पापानि निर्गतानि भवन्ति, तथा च वयं गभीरं संतोषम् अनुभवामः । श्रमशीलस्य जनस्य आचारकर्मणा प्रयोजनं नास्ति । तस्य साधना भवति कर्तव्यमार्गे गमनम् । श्रमसाध्यात् दैनिककर्मणः अनन्तरं यदा कश्चित् कर्षकः सायं निजकुटीरे सुखेन ग्रामगानं गायति, तदा तस्य स्वरः दिव्यं गानं सृजति ।

कायसाध्यं कर्म संतोषं विदधाति, शरीरं च स्वस्थं रक्षति । सांप्रतं मानवाः कायसाध्य-कर्मणः अभावेन रोगजर्जरिता भवन्ति । खलूक्त्वा खलु वाचिकं — कायिककर्मकरा दीर्घं जीवन्ति । स्वस्थे शरीरे स्वस्थं मनस्तिष्ठतीति उच्यते । गम्भीरार्था अपि विषया स्वस्थेन जनेन अनायासलभ्या भवन्ति । स संकटकालेऽपि न व्याकुलो भवति; किं तु वीर्येण तस्य प्रतिकारं संपादयति । सर्वेषां संकटानां समाधानं स पश्यत्येव । मानसकर्मणस्तात्पर्यमवधार्य अस्मदीया ऋषयो लोकहिताय मननं ध्यानं च कुर्वन्ति स्म ।

परिश्रमस्यापरोऽपि कश्चिद् विशिष्टोऽर्थोऽस्ति । अनेनार्थेन कर्म फलयुक्तं फलविहीनं चोभयमेव भवति । कर्षकस्तस्य कृषिक्षेत्रे कठोरं कर्म करोति । एतत् फलयुक्तं कर्मेति गण्यम् ; ... क्रीडासु शरीर-व्यायामेषु च प्रयुक्तः श्रमः फलहीन इत्युच्यते । किं तु एतस्य कर्मणोऽपि निजं महत्त्वमस्ति । महात्मा गान्धी उक्तवान् — यदि कर्म साधनीयं... तदा कथं न करोषि फलयुक्तं कर्मेति । इत्थं गान्धी सर्वप्रकारकाणां कर्मणाम् आनन्दम् अनुभवति स्म ।...

केवलं ते एव देशा अग्रगामिनो भवन्ति येषां निवासिनः श्रमशीलाः सन्ति । विश्वयुद्धस्य आतङ्कमनुभूय जापानदेशः जार्मानिदेशश्च स्वस्वदेशं पुनः निर्ममे तेषां कठोरश्रमेण एव ।

उपसंहारे वक्तुं शक्यते — परिश्रमो जीवनस्य आनन्दः, सृष्टिक्रियाया मूलं चेति ।

(403 श

**Q4. अध:स्थगद्यभागस्य आङ्ग्लभाषया अनुवाद: कर्तव्य: ।** **20**

सुप्रसिद्ध: स्वतन्त्रतायोद्धा राजर्षि: पुरुषोत्तमदास-टण्डन: 1919 वर्षे इलाहाबाद-नगरपालिकाया अध्यक्षपदं स्वीकृतवान् । एतत् तस्य कृते कठिनम् अवस्थानम् आसीत् ।... यद्यपि स: अध्यक्ष आसीत्, आङ्ग्लानां तत्र एतावद् बलमासीत्, तथा च ते एतादृशं प्रभावम् आरोपयन्ति स्म येन सामान्य-भारतीयस्य कस्यचित् कृते तेषां मध्ये स्थित्वा कार्यसाधनं कठिनमासीत् । अधिकारपदं स्वीकृत्य स लक्षितवान् सामरिक-निवास-स्थिता जना जलस्य व्यवहारं कुर्वन्ति, परं करं न ददति स्मेति । स सेनानिवासाधिकरणं प्रति विज्ञप्तिपत्रं प्रेषितवान्, यत्रोक्तमासीत् – जलसंयोगो विच्छिन्नो विधातव्यो यदि आङ्ग्ला मासैककालमध्ये करं न प्रदद्यु: इति ।

एषा विज्ञप्ति: सेनानिवासे, समग्रे नगरे नगरपालिकायां च आलोडनं सृष्टवती । स्थानिकानि वार्तापत्राणि श्रीटण्डनस्य आदेशान् प्रकाशयन्ति स्म । विज्ञप्तिपत्रे जलसंयोगच्छेदनाय निर्दिष्टे अन्तिमे दिने बहव: सेनाधिकारिका नगरपालिकापार्षदा: कार्यालयं समागता अभवन् । एक: प्रवीण: आधिकारिक: श्रीटण्डनम् अवदत् — स सेनानिवासे जलसंयोगं विच्छिन्नं कर्तुं न अर्हतीति । श्रीटण्डन: शान्तस्वरेण उक्तवान् — यदि तस्मिन् दिने करपरिमाणं न प्रदत्तं, तदा तेभ्यो जलं न प्रदत्तं भविष्यतीति ।

स आधिकारिक: कोपेन हुंकारं कृतवान्, किं तु श्रीटण्डन: अविचल: स्थित: । अवसाने सेनाधिकारिका: स्थानत्यागं कृतवन्त: । कार्यालय: उद्वेगाकुलावस्थायाम् अभवत् । सर्वो जन: श्रीटण्डनस्य निराकुलभावेन दृढत्वेन च विस्मयापन्न आसीत् ।

परस्मिन् दिने सेनानिवासस्य आङ्ग्ला आधिकारिका: करं प्रदत्तवन्त: ।

**Q5. अध:प्रदत्तस्य गद्यानुच्छेदस्य संस्कृतभाषानुवाद: कर्तव्य: ।** **20**

In ancient times in most civilized countries, for example, in Egypt, Iraq, India, China and in the Roman Empire, many great irrigation works were constructed. In very hot countries water is even carried in underground channels to prevent it from being evaporated by the sun's heat. In modern times, great dams have been built across rivers and these are used for more than one purpose, hence they are called multipurpose undertakings. Firstly, such dams help to prevent floods, by controlling the amount of water which rushes down a river in the rainy season. This also prevents an enormous amount of damage and loss to farmers. Secondly, by storing up great quantities of water in the artificial lakes behind the dams, irrigation can be provided for many acres of land in the dry season, so that crops can be grown where none would have grown before. Thirdly, the people in the towns and cities in the neighbourhood can be certain of getting a sufficient supply of water for drinking and other purposes, even in the driest weather. Fourthly, the water stored up behind the dams is made to generate electric power by letting it run through turbines.

**Q6.** **(a)** **अधोलिखितानां स्वरचित-वाक्येषु प्रयोगः कार्यः ।** *2×5=10*

(i) कथम् *2*

(ii) नूनम् *2*

(iii) इदानीम् *2*

(iv) अलम् *2*

(v) सह *2*

**(b)** **पदसाधनं क्रियताम् ।** *1×10=10*

(i) अस्मद् + षष्ठी, एकवचनम् *1*

(ii) गुरु + तृतीया, एकवचनम् *1*

(iii) जननी + द्वितीया, बहुवचनम् *1*

(iv) पयस् + सप्तमी, बहुवचनम् *1*

(v) वणिज् + सप्तमी, एकवचनम् *1*

(vi) गम् + लिट्, प्रथमपुरुषे एकवचनम् *1*

(vii) दृश् + लृट्, उत्तमपुरुषे बहुवचनम् *1*

(viii) लभ् + लोट्, मध्यमपुरुषे एकवचनम् *1*

(ix) पठ् + विधिलिङ्, प्रथमपुरुषे बहुवचनम् *1*

(x) स्था + लङ्, प्रथमपुरुषे द्विवचनम् *1*

**(c)** **समासो विधेयः, समासनाम च लेखनीयम् ।** *2×5=10*

(i) भिक्षाणाम् अभावः । *2*

(ii) चतुर्णां पदानां समाहारः । *2*

(iii) समुद्र इव गम्भीरः । *2*

(iv) वीणा पाणौ यस्याः सा । *2*

(v) सर्पेण दष्टः । *2*

**(d)** **अधोलिखितानि वाक्यानि शुद्धीकरणीयानि ।** *2×5=10*

(i) माम् अध्ययनं रोचते । *2*

(ii) मन्त्री राजस्य सभाम् आगतः । *2*

(iii) श्रमेण बिभेति अलसः जनः । *2*

(iv) कर्णे बधिरः वृद्धः । *2*

(v) अस्माकं ग्रामस्य निकषा वनं नास्ति । *2*